This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पौराणिक सुबाल कृष्ण भद्र पौत्र सुंदर स्यादेतच्चिंतामणिपुस्तकमेतत्.

Accession No :- ~~४५१५~~ M1180
Title :- अद्वैतचिंतामणि (आतिक्षापूर्ण)
Author - ?
Date - ?
Subject - ?
पत्रे - 10

(1)

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः॥ श्रीवासुदेवायनमः॥ सत्यज्ञानानंदरूपंवासुदेवंजगद्गुरुम्॥ प्रणम्याद्वैतशास्त्रोक्तसिद्धांतान्संप्रदर्श्यते॥१॥ विश्वेश्वरपर्यंतंबुध्यानुद्दिश्यतेनित्यनैमित्तिकादिकर्मभिस्तत्त्वज्ञानप्रतिबंधककल्मषनिवृत्तिर्जायते। धर्मेणपापमपनुदतीतिश्रुतेः। ततःपरमेश्वरप्रसादाद्विशुद्धांतःकरणस्यविवेकउत्पद्यते। आत्मानित्यस्तदतिरिक्तमनित्यमितिनित्यानित्यवस्तुविवेकः। इहामुत्रफलभोगविरागस्तदनंतरंजायते। ततःशमादिसंपत्तिः। ततोमुमुक्षा। ततस्तत्रनिश्रेयसकामात्मादिनिश्रुत्याज्ञानस्यमोक्षसाधनत्वमवगम्यतेनिश्रेयसकामाः संन्यसंतीतिश्रुतेः। ततस्तज्ज्ञानेबहिरंगंयज्ञादिशास्त्रात्संन्यासस्यज्ञानसाधनत्वमवगम्यतेतदर्थंसंन्यस्यतीति। ननुज्ञानायसंन्यासइतीदमुद्देश्यं। अधीतसांगवेदस्याध्यापयतोगृहीतपदपदार्थसंगतिकस्यसंन्यासंविनापिनित्यानित्यवस्तुविवेकादिद्वारेणज्ञानमनंतंब्रह्मेत्यादिवाक्यादात्मज्ञानसंभवात्। नवविद्वन्मात्रविषयकंज्ञानंमोक्षसाधनतयाप्रागुक्तंसप्तभूमिकासुशिष्ट्वावगाहिबुद्धेरेवप्रागुक्तात्तत्त्वादितिवाच्यं। समानाधिकरणपदानामेकार्थपरत्वं। विशिष्टयोरसमानसत्ताकभेदयोर्दुरपह्नवत्वात्। तदभेदोहिनदृष्टादिनिर्णीतप्रतिसंधानवतःसंन्यासश्रवणादिव्यतिरेकेणापिलक्षणावाविन्मात्रविषयकज्ञानसंभवादितिवेन्न। प्राथमिकज्ञानस्यविन्मात्रविषयकस्यापिसंशयसूपपत्तेर्नाविद्यानिवर्त्तकत्वंसामर्थ्यात्। सर्वमेककोटिकंज्ञानंनिश्चयएवेतिनतत्संशयइतिवेन्न। अस्मिन्निश्रुतेनिश्चयस्यज्ञानित्वात्। तस्याश्चाविद्यादिनिवर्त्तकज्ञानेएवफलत्वेनाभ्युपगमात्। एककोटिकत्वमात्रस्यनिश्चयत्वेऽनभ्यासदशापन्नजलज्ञानस्यापिनिश्चयत्वात्प्राक्तज्ज्ञानेप्रमाणसंशयोनस्यात्। प्रमाणसंशयस्यतद्धानसंशयपर्यवसन्नत्वात्। तद्धानायाश्रवणादिकंज्ञानेनैवविषयीकृतंतत्। यत्तुकैश्चिदुक्तं। प्रमाणंचेन्नतद्धिद्योत्यकत्वावच्छेदेनतत्प्रकारकंतत्। विपरीतसमूहालंबनानुरोधात्। तथाचावच्छेद्यावच्छेदकभावस्यप्रागनिर्णीतत्वात्प्रमाणसंशयइति। तन्त। एकस्मिन्

॥श्रीरामः॥
॥१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वत्तेजउम्भ अणवः केविदिक्तेनिशंकेवनमोहिताः क्षणप्रध्वंसिविज्ञानंकेवनभ्रांतचेतसः। सून्यत्वसंसंस्कारंके
विल्लिरूपाख्यंविमोहिताः केविद्भूतानिचेंछंतिनिसर्गकेवनभ्रमात्। नत्वतत्रैवतर्कोऽप्रवर्तियथाबलम्।
सर्वेवादाः श्रुतिस्मृतेविरुद्धाइतिमेमतिः। पाषिंडानामुजंन्मानतत्रतत्रसुरर्षभाः। प्राक्संस्कारबशादेवजीव
तेस्वविरोधिनिकाः। धर्मोऽयंवसमुत्पन्नंसमस्तामितिकेचन। तत्स्मृतिस्मृतिवाऽस्यविरुद्धंमुनिभुगवाइति। तथारा
मायणेऽयोध्याकांडेभरतंप्रतिरामंवदवाक्यम् कविन्नलोकास्तिकोऽयंतिकोन्नास्तिकोस्तातसेवसे। अनर्थकुशलाहेते
वालाःपंडितमानिनः। धर्मशास्त्रेषुमुख्येषुविद्यमानेषुदुर्बुधाः। बुद्धिमान्लक्षिकीप्राप्यनिरर्थंप्रवदंतिते। इत्यादि। एवंबौद्ध
तवशून्यादैतश्रुतेरन्यार्थताकल्पनीया। किंतुनिर्णीतात्मार्थंकमंत्रादिविरोधान्नवाप्रामाणिकाइतिकल्पनीयम्। त
थाहि। वैशेषिकादिभिरभ्युपगतंनवैवद्रव्यादीतिनियमेनकिंविन्मानम्। अंधकारादेरपिद्रव्यत्वानुषंगात्। बाधकाभावोवा
त्। रूपवत्वादेःसाधकस्यसत्वात्। नन्वरूपवत्वंप्रतीतिभ्रांता। बाधकाभावात्। नन्वधर्मप्रमाणस्याश्रयतावाच्या। तथाच
स्पर्शशून्यस्यतस्यारूपवत्वानुपपत्तिः। रूपादिवन्नदुपपत्तेः। नन्वेकार्थद्रव्यस्यस्पर्शवत्वेनियमः। अप्रयोजकत्वेननिय
मासिद्धेः। किंचद्रव्यत्वेनगुणाश्रयत्वम्। रूपादावतिव्याप्तेः। तथाहि। बहूनिरूपाणि रूपरसात्यथक्कृदंरूपंपरंमिदमपरमि
त्यादिप्रतीतिः सर्वजनसिद्धा। नचासौभ्रांता। बाधकाभावात्। अन्यथाघटेपिसंख्यादिकंनसिध्येत्। नचगुणाश्रयेसंख्यावे
शिष्ट्यबुद्धिः परंपरासंबंधायगाहिनी। वैपरीत्यस्यापिसमत्वात्। नचाश्रयेव्यभिचारिनियामकंतथासतिज्ञातोवसंख्यादि ॥श्रीराम॥
कमस्तुजातीनांव्यपेक्षयाल्पत्वेनतन्मात्रेसंख्याघभ्युपगमेलाघवात्। निसद्रव्यमात्रेवा। अन्यत्रपरंपरयातद्वे ॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रेणानान्यथासिद्धिरिति वाच्यम्। घर्मिग्राहकमानेन हि लाघवतर्कसहकृतेन सकृत्संयुक्तसमवायेश्वरमेव विषयीकरोति। नत्वक्षुःसंयुक्तत्वादिकं। तस्मात्तेनेश्वरो[illegible]द्रि
न्द्रियाकाशः कालस्त्वात्मेतद्याकुरुसएवसर्वं करिष्यतीत्येवमनःसंयोगप्रमाणभावादपिनवै। नचव्याप्यसंसर्गान्मध्यानुपपत्ति
तसिद्धिः। अदृष्टविशेषेणचक्षुरुत्पत्तावात्मदृपपत्तेः। अन्यथायदमनस्कचक्षुषासंयुक्तंतदग्रेत्रेणकिंनसंयुक्तं। तस्मात्तत्रागतस्यदृष्टस्येतिव्याप्त
कत्वाभ्युपगमेतनेत्वव्याप्तेरुपपत्तौ किंमनसानानुरुत्वायुपरुध्येः करणसाध्येनानुमानात्तसिद्धिरितिचेन्नाचक्षुरादिनाव्यभिचारात्। नचचक्षुषारू
पादिमद्द्रव्यसमवायित्वेसतिबाह्येन्द्रियत्वात्तस्यानुमानात्। एकेनेंद्रियेणतत्संयुक्तेकालावच्छेदेनरूपादिग्रहोपपत्तौ करणानानात्वप्रमाणभावात्। तथाहि। चक्षुरेवसंकोच
विकाशशीलंनयनेनोलकद्वारानिस्सृतंसद्रूपादिकंगृह्णत्करणंशष्कुल्यवच्छिन्नंसत्वात्। करणंशष्कुल्यवच्छिन्नंसत्वात्। यद्यद्करणंतत्तदवच्छिन्नं। सर्वशरीरव्याप्येसत्यप्रतिघ्रातत्वात्। नासाग्रावच्छिन्नंसद्दूरंगच्छ
त्यग्रावच्छिन्नंसद्दूरं। अनवच्छिन्नंसदेवसुखदुःखादिकं। एवंचक्षुषेवसकलग्रहोपपत्तावनेकेंद्रियकल्पनेप्रमाणाभावः। नचाविनिगमः
संकोचविकाशशीलत्वेनयोगवत्तेनचचक्षुषएवतत्सीकारोविषयात्। नचैकस्यावच्छेदकभेदेनग्राहकत्वाग्राहकत्वेनदृष्टमितिवाच्यम्। एकस्याए
वस्त्रस्यशुक्लिकावच्छेदेनधूमस्यशीघ्रग्राहकत्वेनान्यावच्छेदेनतेतमाभ्युपगमात्। नचैवंजन्मांधस्यापिरूपग्रहापत्तेः। स्पर्शग्रहेऽपिवान
स्यादितिवाच्यम्। इन्द्रियेयत्रयस्यादृष्टविशेषोपग्रहीतकरणशष्कुल्यभागावच्छेदेनग्रहवदृष्टविशेषोपग्रहाभावादेवस्यशक्तिहेपितदस्य
हेपपत्तेः। तस्मात्। एकस्यैवेंद्रियस्यहनानात्वंवेदभेदतः। तन्नैकंहिगुणासंख्यानमभ्युपगम्यतेनैकंकल्पयेद्गुरुः॥ तस्मान्नवैवद्रव्याणीत्यसंयुक्तम्
एवंचनुर्विंशतिगुणाइत्यप्ययुक्तं। तेषामगुणेसंख्यानभ्युपगमात्। औपचारिकोयंशब्दप्रयोगः। जघंपरयासंख्यायाः सत्तासंबन्धात्संख्या
व्यवहारइतिचेन्न। तथासतिचतुर्विंशतिर्गुणाइतिनियमानुपपत्तेः। परादुगुणाइतिज्ञानस्यप्रमात्वापातात्। द्वित्वसंयोगाभावात्। नित्यविभाग
प्रमाणाभावान्नचतुर्विंशतिः। नचविनिगमकाभावादुभयोरपिभावत्वम्। कपालसंयोगादेर्घटादिकारणत्वाभावकारणत्वेचतुस्त्वेवतत्त्वंद्वित्वविनिग
मकत्वात्। नचशष्कुल्यारब्धभूतविभागस्यापिभावत्वेलाघवम्। विभागस्यशब्दकारणत्वेप्रमाणाभावात्। वंशदलादिक्रियाजन्यैर्हेतुभिर्लोकेसंयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूपयोः संयोगविशेषत्वात् अन्यथा चाक्षुषत्वयोगात् एतच्च लीलावत्यादौ स्फुटम् अतएव करकादौ का द्रव्येषु रूपं
भाषि सर्वसिद्धमेवेति एवं द्रवत्वादपेक्षाबुद्धिजन्यत्वाभिधानमपि न युक्तिसहम् तस्मात्तद्धजकतयापि उपपन्नावे
कत्वेवलक्षण्येनैवेतीत्याभाणकात् अनेकाद्धत्वाघृतस्नेहगोरवाच्च अन्यथा ह्रस्वीर्घसादेरप्यवधित्वान्नजनकमेवेति
वदन्तः समाद्रियन्ते किंबहुना अग्नसंयुक्तसंयोगसामग्र्यं जकपवनादेरविशेषोत्पादकत्वेवस्थादितिसाधु
समर्थितं तेजसरूपस्यम् एवं द्रवत्वं स्यन्दनं च त्रिलक्षणमपि निष्प्रमाणम् ननु भास्वरमाज्यं नक्तं कठिनं तान्तवसंयोगेस
र्पिषीतरूपद्रवत्वयोरनुद्भूतिर्निर्दिश्यते सा वासतिविरोधिद्रवद्रव्यसंबंधेऽनुपपन्ना पार्थिवद्रव्येत्यादिनातत्स
योगरूपादिपरावृत्तिनेरावश्यकत्वात् तच्च विरोधिद्रव्यं द्रवजलसंसिद्धिकद्रवत्वस्यन्दनेसतिरूपवत्तेजो
एवेतिसिद्धद्रवत्वस्यतेजोवृत्तिलमितिवेन्तत्तेजसोरूपपरावृत्तिप्रतिबंधकत्वेघटपिपाकेनरूपपरावृत्ति
र्नस्यात् तेजोविशेषः प्रतिबंधकोनसर्वतेजइतिवेन्न पार्थिवविशेषस्येवप्रतिबंधकत्वोपपत्तौतत्र तेजोत
रकल्पनेतस्यानैमित्तिकद्रवत्वकल्पने वप्रमाणाभावात् नैमित्तिकद्रवत्वस्यदृष्टिवीचत्वाप्यत्वाश्रेति एवंपा
रिमांडिल्यकाधिकारणनेसंयोगविनाशोरूपसंतानाभावस्येवतस्मिन्नेविमहत्तासंतानाभावस्यप्रयोजकत्वेनतत्व
प्रसङ्गेप्रसक्तसंयोगविरोधिनस्यहेतुत्वात् एवंघटपटोभयनिरूपितसंयोगस्यैकत्वेसत्यवयवयुक्तसंयोगस्यैक
वस्यवतद्भेदस्यैवोपनायकत्वात् संबंधिनावच्छेदकभेदेनसंबंधिकल्पनौचित्यंतदितिपरेणाभ्युपगमात् नच्चा

॥ श्रीराम ॥
॥४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्रमणेरेत्नादेरप्यधिकस्य सत्वात् तस्यागमनविशेषवेऽरेपरमाणादिकमपिगमनविशेषणवत्तु नचाकुंचनादौगमनव्य
वहाराभावान्नदोषः भ्रमणादेरपिवैतन्नाभेदापत्तेः व्यवहाराभावस्यतुल्यत्वात् तस्मात् भ्रमणगतिभेदश्चेद्वृक्षावक्षेपणगत
किंमपराद्धमतः सर्वत्रसिद्धाताः कुमुक्तिकाः एवंकर्मणोव्याप्यवृत्तित्वनियमोऽपिप्रामाणिकः एकदेशपटश्चल
तीतिप्रतीतेः नचास्यावयवगतं कम्पंवैविषयीकृतेनपटगतमितिवाच्यम् पटत्वसामान्याधिकरण्येनकर्मणोवि
षयीकरणात् अन्यथापटः संयुक्तइतिप्रतीतेरवयवसंयोगेनाप्युपपादयितुशक्यत्वात् तस्मात्संयोगवत्कर्मण्यपि
व्याप्यवृत्तेवेति एवंसामान्यपदार्थोऽपिनसमवेतः प्रेक्षावतः नचानुगतप्रतीत्याघटत्वादिसामान्यसिद्धिः प्रतीतेरनुगतत्वमेक
स्वविषयतंवेत्तदसिद्धमेवाव्यक्तेधर्मेवेदुपपत्तेभाइतिसम्प्रदायात्तेवनात्रिषेकुसामान्यसिद्धिर्व्याप्यवृत्तेः तद्वघ
दृत्तादेर्व्यापकएथिवीत्वादेर्व्याप्यमिसभ्युपगमेपरापरभावस्याप्युपपत्तेः प्रतियोगित्वानुयोगित्वाभावत्वाद्यनुगत
बुद्धेर्व्यभिचारात्चनतस्याजातिसाधकत्वम् नापिकारणतावच्छेदकत्वादिनाजातिसिद्धिः कारणत्वादस्यनत
स्वरूपत्वपर्यवसानेननचानुगतावच्छेदकत्वानपेक्षणात् नापिपदशक्यतावच्छेदकत्वेन तथात्वेऽदृष्टपदशक्य
तावच्छेदकत्वेनादृष्टस्यापिजातित्वापत्तेः तद्वासमवेतपरस्य नचानुगतजातिसंनगीकारेऽपूर्वघटादौशक्तिग्र
हाभावान्नबोधानुपपत्तिः प्रतियोगीदमित्यादिपदादिवन्नदुपपत्तेरिति एवंजातिसंकरस्यदूषकतास्युपगमो
विदुराग्रहमूलकः उपाधिसंकरतुल्यत्वात्तस्य नचैवमभ्वेत्नोभावानुमानेनस्यादितिवाच्यम् उपाध्योः साकर्यशरीरतेनेंद्रियाभावानुमानेनस्यादितुल्यत्वात् तस्मान्नसामान्यपदार्थो ॥श्रीरामा॥ ॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पितदुपपन्नेः।तस्मात्।विशिष्टबुद्धेः।कुंभेनस्वरूपेणवसंबंधात्।समवायाभ्युपगमःपरस्यापमहोमुधा।।
एवमभावपदार्थाभ्युपगमोऽपिनिर्मूलः।तथाहि।यथाएकेनैवघटस्वरूपेणएतंप्रतियोगीअनुयोगीविशेष्यो
विशेषणमुद्दश्योविधेयोदंडवन्नीलोयद्वदनीलोघटइत्यादिव्यवहारःपरैर्निर्वाह्यते।तथैवाभावव्यवहारोऽधिक
रणस्वरूपेणैवतत्तदधिकरणनिष्ठःपदार्थैर्निर्वाह्यताम्।ननुदेशकालावस्थेदेनविद्यमानेपुनस्तत्रनियोगि
कल्पनेलाघवात्किंपदार्थांतरेण।ननुतथाधिकरणस्यैवाभावत्वेघटकालेऽप्यभावप्रतीतेःप्रमाणापत्तिः।
अतिरिक्ताभावाभ्युपगमेऽपितुल्यत्वात्।अतिरिक्ताभावाभ्युपगमेऽपितुल्यत्वात्।असंताभावस्यत्रैकालिकत्वेननिषे
धत्वेनघटवत्सपिसत्वात्।नचतदानीमधिकरणेनसमंतस्यसंबंधोनास्तीतिवाच्यम्।तदभ्युपगतस्वरूपसंबंधस्य
स्वरूपात्मकस्यतदानीमापेसत्वात्।प्रतियोगिदेशान्यदेशतंसंबंधः।तस्यस्वरूपादतिरेकेऽप्यपदार्थानंतर्भावात्।
अनतिरेकेचोक्तदोषात्।किंचxनवxयत्किंचित्प्रतियोगिदेशान्यदेशत्वंस्यघटवत्सपिसत्वान्नत्रापितदत्यंताभा
वापत्तिः।स्वप्रतियोगिदेशान्यदेशत्वंवाकाशसंताभावादावप्रसिद्धम्।वस्तुतस्तुप्रतियोगिदेशान्यदेशत्वंसं
बंधत्वेघटवतितदसंताभावबोधोऽपिप्रमाभ्यात्।संबंधस्यसत्वात्।ननुप्रतियोगिदेशान्यदेशत्वंनास्तीतिचेन्न।
अन्योन्याभावस्यापिसत्वात्।तथाप्यन्योन्याभावसंबंधोस्मिन्नधिकरणेनास्तीतिचेन्न।अन्योन्याभावसंबंधो

।।श्रीराम।।
।।६।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिप्रतियोगितावच्छेदकदेशान्यदेशत्वम् । तथापि निष्ठसंबंधोऽपि निष्ठसंबंध एवमुत्तरोत्तरमपीति तद्वृत्तितदभावबुद्धेः प्रामाण्यं
तिवेलातत्संबंधो हि तत्प्रतियोगितावच्छेदकदेशान्यदेशत्वं तदपि निष्ठसंबंध एवमुत्तरोत्तरमपीति तद्वृत्तितदभावबुद्धेः प्रामाण्यं
दुष्परिहरम् । एतेनविषयानवस्थादोषायेवद्वृत्तिप्रतिबंधिकानवस्थानास्त्येवेऽकावच्छेदकसंबंधस्यप्रसक्त्याविषयत्वादितिनि
रस्तम् । घटवत्तितदभावबुद्धेः प्रमात्वस्यैवापाद्यमानत्वादिति । किंचैवंघटाद्यसत्त्वानंतरंतदधिकरणेघटसंताभाववत्तत्स्यात् ।
तन्मतेऽन्योन्याभावस्यव्याप्यवृत्तित्वेनतस्मिंस्तदन्योन्याभावतत्सामानाधिकरण्याभावेनसमंसंबंधाभावात् । नचस्वस्व
पान्यकोपिफलदलकल्पःस्वरूपसंबंधस्तदानीना ×भाव×स्तीतिवाच्यम् । अतिरिक्तभावानभ्युपगमेऽपितादृशस
म्बंधानेदुर्निरूपत्वात् । नचानुगतेरधिकरणस्वरूपैरनुगताभावप्रतीत्यनुपपत्तिः । अननुगतस्वरूपैरेवदेशत्वविधेय
त्वाद्घनुगतबुद्धेरिवास्यापिसंभवात् । प्रतीतेरनुगतत्वस्यनिर्वक्तुमशक्यत्वाच्च । द्वयोर्घटान्योन्याभावोनपरोघटान्योन्या
भावोनेत्याद्यनुगतबुद्धावनुगतविषयत्वस्यपरैरप्यनभ्युपगमाच्च । अन्योन्याभावस्यतन्नद्भावस्वरूपताभ्युपगमा
त् । किंचास्तुनामाभावस्तथापितत्रानुयोग्येप्रमाणाभावः । तथाहि । समयविशेषसंसर्ग्ययोगाभावेनेवसर्वव्यवहारोपप
त्तौकिंप्रागभावध्वंसाभ्याम् । नचप्रागभावाभावेभविष्यतीतिप्रतीसनुपपत्तिः । तस्याऽसत्त्वेभविष्यत्कालसंबंधावगाहिनय
प्रागभावाविषयत्वात् । किंचयथाप्रागभावएवकदाचित्कपालेषुघटोनास्तीतिकदाचिद्भवोभविष्यतीतिप्रतीयतेऽपथावाध्वं
सएवकदाचिद्भूतोध्वस्तइतिकदाचिद्भूतोनास्तीति । एवमसंताभावएवकदाचिद्भूविष्यतीतिकदाचिन्नास्तीतिकदाचिद्भूस्तइति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रतीतेर्विषयोस्तु एवं वभूतलेघटोध्वस्तइतिप्रतीतिरपिसंगच्छते। नचैकस्यकालभेदेनविचित्रप्रतीतिनिर्वाहकतानुप
पत्तिः। नचातेवाघटोत्पत्तेःपूर्वमपिघटोध्वस्तइतिप्रतीत्यापत्तिरितिवाच्यम्। यथास्वरूपात्मिकापिदंडादेर्वदनइतिवोधेदंड
स्यविशेषणतैवनविशेष्यता। देवदत्तेनदंडइतिवोधेदंडस्यविधयतैवनोद्देश्यतानिर्वाहात्तेनदंडस्वरूपेणतथैवान्याप्यभ्युपगमेन
धकाभावात्। अस्तुवाध्वस्तइतिविलक्षणप्रतीत्यनुरोधेनध्वंसः। प्रागभावनिध्यमाणकएव। पनुप्रागभावानभ्युपगमेउत्प
नोपुत्पद्येतेति। तन्न। उत्पन्नस्यैवप्रतिबंधकत्वात्। तन्मतेपिदेवदत्तेस्वोभाविघटज्ञानस्याहमितिज्ञानस्यचेदानीमवोत्पत्ता
पत्तेस्तुल्यत्वात्। नचप्रागभावस्यापिसत्वात्। कालविशेषोपिनत्रापेक्ष्यतेइतिवेन्नहितदभावान्नोत्पन्नस्यानुत्पत्तौकिंचा
गभावेन। नचैवंकालमात्रस्यकारणतापत्तिः। एककालोत्पन्नकार्यंप्रतिविभिन्नार्थकारणंप्रतिनस्यावश्यकत्वात्। सामग्रीभेदवि
नाकार्यभेदायोगात्। एवमन्योन्याभावोपिनातिरिक्तआवश्यकः। घटत्वाद्यसंताभावेनैवघटोनेत्यादिप्रतीतेर्निर्वाहात्।
ननुघटत्वाद्यसंताभावस्तोनेघटत्वज्ञानंकारणं। नचघटान्यत्वादित्यादिगर्भितात्माश्रयापत्तिरितिवाच्यम्। घटइतिप्रती
तिप्रकारत्वादेवघटत्वेनात्माश्रयानेद्यत्वकाशणात्। वस्तुतस्तुफलीभूतेवोधेप्रतियोगिविशिष्टोयोधर्मःप्रकारतया
भासतेतत्प्रकारकप्रतियोगिज्ञानमभावज्ञानेकारणमितिघटप्रकारकघटत्ववुद्धौसत्यांतदसंताभावबोधोनिष्प्रत्यूहः। नि
ष्कर्षस्तुसएवाभावोयदाघटत्वावच्छिन्नघटप्रतियोगित्वेकेनप्रतीयतेतदाभूतलेघटोनेतिप्रतीतेरुल्लेखः। यदाघटत्वावच्छिन्न
घटत्वप्रतियोगिकेतेनानुभूयतेतदाभूतलेघटेनास्तीत्युल्लेखइतिनान्योन्याश्रयादिदोषोपीतिनकाप्यनुपपत्तिः॥ ४ ते ४ नस्मा॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वरूपसंबंधैः सर्वप्रत्ययसंभवे। भावाद्विलक्षणाभावस्वीकारोभ्रममूलकः। एवं योग्यानुपलब्धिरभावग्राहि
केऽपिमन्दमप्रमेयत्वादिग्रहे व्यभिचारेणाभावग्रहेऽभावानुपलब्धिरिवाभावग्रहेपिभावानुपलब्धेरहेतुत्वात्। न
चैवं घटप्रसक्षानंतरमपितत्रतदभावग्रहः स्यादितिवाच्यम्। किंभ्रमआपाद्यतेऽतप्रमाआद्येदोषाभावादि
सुत्तरम्। जैसेविषयाभावादिस्मृत्यस्मृति। नैवपाषाणेचूरभ्रमदशायांतदभावप्रमापत्तिः। तत्रभ्रमजनकदोष
स्यैवप्रतिबंधकत्वात्मुख्याभावाद्वातदभावोपपत्तेः। अन्यथाभ्रमस्वर्दूषणेचूटाभावग्रहः किमितिनभवेत्। किं
वानुपधव्येर्योग्यत्वंतत्किंतत्प्रतियोगिसत्वप्रसंजितप्रतियोगिकत्वम्। एवंचवस्तुभेदेदिक्षुत्वावत्स्यान्नहियोग्यत्व
किंगुन्निस्यात्तथावोपलभ्येतेतिचत्परमाणुर्यदिमहान्स्यान्यदिभूतलंदृष्टिः स्यात्तर्युपलभ्येतेसापादनसंभवेना
भावेयोग्याऽयोग्यविभागोनस्यात्। पक्षिंविद्विशेषणप्रक्षेपेणसर्वत्रैतादृशापादनसंभवात्। तस्मान्नकिंचिदेतत्
।।एवंद्रव्यादिपदार्थेषुवक्ष्यंतेषुनदृष्टानिसर्वाण्यनिर्वचनानिरवंचितप्रामाण्येव। किंचपरोक्तानिसर्वाणिलक्ष
णानिकालकालोपाधिदिग्गुपाधिषुनियामानि। पक्षस्वरूपसंबंधविशेषणतत्रतानिनसङ्कीर्तीनि। तन्नाच्य
रूपसंबंधस्यस्वरूपात्मकत्वात्तस्यापिसत्वात्। अतिरिक्तेवासोप्यस्त्येव। कात्स्न्यैः सर्वाधारत्वात्। अपसिद्धांतश्च
।ऊनपदार्थेषुनस्यानंतभागात्। दृष्टांतोयंदंतभवेवाएकएवपदार्थोस्तुकिंवोऽनेकपदार्थादिपरिकल्पनया। किं
चस्वरूपस्यसंबंधत्वेसर्वत्रप्रतीतिः प्रमास्यात्। ऊनत्वविस्वरूपसंबंधेनरजतत्वादेः सत्वात्। नवैवंनेदंरजत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मितिबाधानुपपत्तिः। परंपरासंवेधेनरक्तरूपवत्पिप्पलिकेनायंलोहितइतिवत्समवायसंवेधेनतरजतलाभावा
न्नेदंरजतमितिबाधोपपत्तेः। तस्मान्नजगदाधारतासाध्याकाशादीनांसत्यत्वादीनांसत्यंयाथवा। कार्यवेदांतसिद्धांतपादसेवा
गतत्रयम्॥ ॥अन्येवंविधाभावाघटितमतःपदार्थाअपिनिरस्तावेदितव्याः॥ ॥नन्वेवंपदार्थपरंपरंडनेलक्षितेसति
अप्युक्तिप्रत्यक्षेरन्नितिचेन्न। अस्माकमेतादृशप्रक्रियायामाग्रहाभावात्। तदुक्तंसुरेश्वराचार्यैः। ययायथाभवेत्सुसं
व्युत्पत्तिःप्रसगात्मनि। सासैवप्रक्रियाज्ञेयासाधीसावानवस्थिते॥ तथाहिसिद्धांतमहारत्नरत्नाकरेश्रीमदुत्तम
।घुषाभिरेवनिपुणैःसुविचार्यएषयेषांमहाकृतिरियंव्यवहाररक्षा। अस्माकमप्यनिजरूपमभीप्सतांकिंस्वप्नो
पमंव्यवहृतःपरिरक्षणेनेति। अन्यैरप्यभियुक्तैरभिहितम्। प्राचीनैर्यावहारसिद्धविषयेष्वात्मैक्यसिद्धोपरंसन्त
ह्यद्धिरनादरात्सरणयोनानाविधादर्शिताइति। किंतुश्रुतिस्मृत्यनुरोधेनवास्माकंपदार्थाभ्युपगमः। केवलकु
तर्केणपदार्थनिर्णयायोगात्। वेदैकगम्यब्रह्मादिनिर्णयस्यतुस्मृतरामयागात्। तदुक्तंमहाभारतेआरण्य
केपर्वणि। शुष्कतर्कंपरित्यज्यआम्नायस्वस्मृतिंस्मृती। एकस्मिन्संवृद्धतर्वेहेतुभिरिष्यसि। बुद्धिर्नतस्यसि
द्धेतसाधनस्यविपर्ययादिति। तस्माच्छ्रुत्यनुरोधेनेवपदार्थाअभ्युपेयाः। तथाहिआत्मादेहातिरिक्तः। न
जायतेम्रियतेवाविपश्चिन्नायंकुतश्चिन्नबभूवकश्चित्। अजोनित्यःशाश्वतोयंपुराणोनहन्यतेहन्यमा
नेशरीरेइतिश्रुतेः। विलक्षणःस्थूलसूक्ष्मादेहादात्मेक्षितासूद्कू। यथाग्निर्दारुणोवाह्याद्दाहकोन्यःप्रका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शकरतिस्मृतेश्च। देहातिरिक्तात्मानमभ्युपगमेपहापुरुषेषूपलभ्यमानाजातिस्मरतिरनुपपन्ना। अननुभूतेस्मृ
तियोगात्। एवंपरशरीरंप्रविश्यब्रह्मराक्षसादीनांगयापिंडदानादिप्रार्थनाप्यनुपपन्ना। एवंनामभ्रमेणप्यमभेदे
नीतानांपरावृत्तिः। तत्रसवार्त्तिकंयनादिकमप्यनुपपन्नं। नचेदंसर्वंभ्रमः। भ्रमाहेवाधकाभावात्। धियांभ्रमा
णप्यस्योत्सर्गिकत्वात्। गयापिंडदानानेतरंब्रह्मराक्षसकृतपीडापानिवृत्तिदर्शनाच्च। देहस्थेवात्मतैकृतहानाऽ
कृताभ्यागमश्च। तस्माच्छरीरात्सुदेवभक्तानांदृश्यतेप्राग्भवस्मृतिः। सान्यथानेवघटतेतस्मादात्माननोःपृथ
क्त्वं॥ ॥सवस्यप्रकाशज्ञानस्वरूपः। अत्रायंपुरुषःस्वयंज्योतिरितिश्रुतेः। भात्याद्ययोगुणःश्रुद्धःस्वयंज्योति
रंशतः। अग्निवदासवद्देहःकस्यहाकस्यसंसृतिरितिस्मृतेश्च। आत्मनःस्वप्रकाशज्ञानस्वरूपत्वानभ्युपगमे
घटोयंघटोयमितिधारावाहिकज्ञानानंतरमाप्रहरंघटमेवाहमनुभवन्नासमितिसार्वजनीनंस्मरणंनसंगच्छते।
अननुभूतेस्मृतियोगात्। तथाहिनेतावद्यौमध्येवानुव्यवसायाभ्युपगमेधाराविच्छेदापत्तेः। नान्यदवैरूप्यमितिस्मृ
तिबाधश्च। यत्तुनेदंस्मरणंकिंत्वनुभवोवरानुमितिरितितन्न। लिंगाभावेनानुमितेरयोगात्। तथाहि। ननावस्थ
व्यवहारोलिंगं। व्यवहारज्ञानेपूर्वोक्तानुसंधानदर्शनात्। व्यवहारेणज्ञानमात्रसिद्धावपितस्मिन्प्रहरसंवेद्यस्य
वाद्यत्वादिविशेषस्यवसिध्ययोगाद्ज्ञानंप्रहरंपक्षतावच्छेदकंकृत्वाएतत्प्रहरावच्छिन्नोहंघटज्ञानवान्घटंव्यवहर्त्ती
त्यनुमितिसाध्यमानेपक्षतावच्छेदकावच्छेदेनसाध्यसिद्धेःप्रहरावच्छिन्नज्ञानसिद्धिरितिवाच्यम्। तावतापिवाद्यत्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वादिविशेषस्य ज्ञानेऽसिद्धेः। तेन विना अदः सममस्मात् सममित्याद्यनुभवायोगात्। यथा कथंचिद्विज्ञानानुमानेपित
दमन्यन्नावदिषमितीतरविषयकज्ञानाभाववतीमनुपपत्तिः सुदृढैव। नच घटज्ञानेनेवतदतीतनेतरज्ञाना
भावानुमा। युगपदनेकविषयकज्ञानसंभवेनेकज्ञानस्येतरज्ञानाभावेनसममव्याप्यभावेनानुमित्ययोगात्। तस्मै
त्तत्प्रकाशात्मस्वरूपज्ञानेनैवघटपटाद्याकारकृत्तयस्तद्भावाच्च भास्यन्तइति तदुत्पादेव धारानुसंधानम्॥ ॥
एवंस्वाप्नपदार्थज्ञानमपिस्वप्नकाशसाक्ष्येव। तदन्यज्ञानस्यतत्रासंभवात्। नचस्मृतिरूपंततः देशविशेषवैशिष्ट्यस्य
पूर्वमननुभूतस्यस्मरणसंभवात्। नन्वदृष्टविशेषाद्विशंकलितपदार्थोपस्थितौसत्यां तामेवस्मृतिंप्रत्यासन्नी
कृत्यमनसातावद्विषयकंविशिष्टज्ञानमुत्पाद्यतइतिकिंसाक्ष्येणेतिचेन्न। ज्ञानस्यप्रत्यासन्निहेऽनुमानादिप्रामा
ण्योच्छेदापत्तेः। तथाहि। वह्निनासाकंज्ञानलक्षणप्रत्यासत्तेःसत्यत्यंतेपिकिमितिवह्निप्रसक्तमेवनभवेत्।
समानेविषयेप्रसक्तसामग्र्याअनुमितिसामग्रीतोबलवत्वात्। नचालोकिकप्रसक्तसामग्यपेक्षयानुमितिसा
मग्रीप्रबलेतितस्याएवोत्पत्तिरितिवाच्यम्। तथासतिभ्रमरूपेविशेषदर्शनाज्ञानतरंभ्रमरूपंपुरुषप्रसक्तंनस्यात्। त
स्यालोकिकत्वात्। नचप्रमानुमितिसामग्रीबलवतीभ्रमरूपविशेषदर्शनस्यतेनासानास्तीतिवाच्यम्। भ्रमानुमित्यु
च्छेदप्रसंगात्। नन्वनुमितिसामग्र्यबलेननुतन्नियामकविशेषोस्तीतिवाच्यम्। तर्हिपरंतेपिवह्निप्रसक्तमेवास्तुकिमनु
मित्या। नन्वेवंपरंतेवह्निमनुमिनोमीत्यनुव्यवसायोनस्यात्। तत्रानुमितित्वाभावादिति चेन्न। अनुमितित्वशब्दत्वादिकं

॥ श्रीरस्तु ॥
॥ ६ ॥


वाच्यम्। अधिकरणभेदस्यभावेतदभावबुद्ध्यनिरूढत्वात्। तावच्छेदकस्याश्रयत्वादेरयोगात्। तदधिकरणवह्निसंयोगस्य
साध्यत्वेतमनुभवपरामर्शसंभविनातथात्वेप्रायेणसर्वत्रप्रतीतिप्रसंगात्। तस्मान्मनसोभेदेनसंबंधः। नासिमनसःसहकारीयोग्यानुपलंभकालीनानु
ईश्वरस्यप्रसक्तयोग्यत्वात्प्रसक्तयोग्यस्यानुपलब्धेर्योग्यानुपलब्धेःप्रतियोगितयाचेतरसकलतदुपलंभकालीनानु
पलब्धेश्चासंभवान्। घटेमनस्त्वंनास्तीतिज्ञानंवपरमाणुत्वेनास्तीतिज्ञानंवन्नप्रसक्तम्। नहिमनसोघटेन
सप्रतिसंधानदशायोन्नदनुभवोस्ति। अतएवोक्तंद्वियेघटाद्यभावोनप्रसक्तः। नवनाहंमीश्वरइतिभेदप्रतीतिर्दशायामी

RAMTEK
441106
M 1180
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=24.09.20 10:44
,TRANSFERRED=2020/09/24 at 10:47:02
,PAGES=18
,TYPE=STD
,NAME=S0003709
,Book Name=M-1180-ADAITCHINTAMANI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection